कर्म्मदेवानामानन्दः ये कर्म्मणा देवत्वमभिसम्पद्यन्ते अथ ये शतं कर्म्मदेवानामानन्दाः। स एक आजानदेवानामानन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः। अथ ये शतं आजानदेवानामानन्दाः। स एको देवलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः। अथ ये शतं देवलोक आनन्दाः। स एको गन्धर्व्वलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः। अथ ये शतं गन्धर्व्वलोक आनन्दाः। स एकः प्रजापतिलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः। अथ ये शतं प्रजापतिलोक आनन्दाः। स एको ब्रह्मलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः। एषः ब्रह्मलोकः सम्राट्। शिवः यथा, महाभारते। १३। १७। १४२।

"निर्व्वाणं ज्ञानश्चैव ब्रह्मलोकः परागतिः॥")

ब्रह्मवद्यं, क्ली, (ब्रह्म वेदस्तस्य वदनम्। "वद सुपि क्यप् च।" ३।१।१०६। इति भावे यत्।) ब्रह्मणो वाच्यम्। इति त्यप्रकरणे मुग्धबोधटीकायां दुर्गादासः॥

ब्रह्मवद्या, स्त्री, (ब्रह्मणा वेदेन उद्यते या। "वदः सुपि क्यप् च।" ३।१।१०६। इति कर्म्मणि यत् स्त्रियां टाप्।) कथा। इति मुग्धबोधव्याकरणे त्यप्रकरणम्॥

ब्रह्मवर्च्चसं, क्ली, (ब्रह्मणो वेदस्य तपसो वा वर्च्चस्तेजः। "ब्रह्महस्तिभ्यां वर्च्चसः।" ५।४।७८। इति अच्।) ब्राह्मणस्य वृत्ताध्ययनर्द्धिः। इत्यमरः। २।७।३६॥ अस्य टीका। वेदबोधितस्याचारस्य परिपालनं वृत्तम्। व्रतग्रहणपूर्व्वकं गुरुमुखेन वेदाभ्यासोऽध्ययनम्। तयोर्द्धिस्तत्परिपालनजतत्तेजश्च उपचयो ब्रह्मवर्च्चसं स्यात्। ब्रह्महस्तिराजेति अः। इति भरतः॥ तपःस्वाध्यायजं यच्च तेजस्तु ब्रह्मवर्च्चसम्। इति जटाधरः॥ (तथा च मनुः।४।९४।

"ऋषयो दीर्घसन्ध्यत्वाद्दीर्घमायुरवाप्नुयुः।
प्रज्ञां यशश्च कीर्त्तिञ्च ब्रह्मवर्च्चसमेव च॥")

ब्रह्मवर्त्तः, पुं, (ब्रह्मणां ब्राह्मणानां वर्त्तः वर्त्तनं यस्मिन्।) ब्रह्मावर्त्तदेशः। इति शब्दरत्नावली॥ (सरस्वतीदृषद्वत्यो र्देवनद्यो र्मध्यगतोऽयं प्रदेशः॥)

ब्रह्मवर्द्धनं, क्ली, (ब्रह्मणस्तपसो वर्द्धनं यस्मात्।) ताम्रम्। इति हेमचन्द्रः। ४। १०६॥

ब्रह्मवादः पुं, (ब्रह्मणो वेदस्य वादो वदनं पठनमिति यावत्।) वेदपाठः। तत्पर्य्यायः। श्रुताध्ययनम् २। इति हारावली। २२१॥ (यथा भागवते। ४। २२। ६२।

"इत्यकृतिर्ब्रह्मवादे आत्मवत्त्वे स्वयं हरिः॥"
ब्रह्मणो ब्रह्मनिर्णयस्य वादः कथनमिति विग्रहे ब्रह्माधिकारेण तत्त्वनिर्णयवाक्यम्। ब्रह्मवादो वेदपाठोऽस्त्यस्येति ब्रह्मवादर्विशिष्टे, त्रि। यथा, हरिवंशे। ८२। ३४।

"ब्राह्मणैर्ब्रह्मवादैश्च पुराणोऽयं हि गीयते॥")

ब्रह्मवादी, [न्] पुं, (ब्रह्मवादो वेदपाठोऽस्यास्तीति। ब्रह्मवाद+इनि।) वेदवक्ता। तत्पर्य्यायः। वेदान्ती २। इति जटाधरः॥ यथा, गीतायाम्। १७। २४।

"तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः।
प्रवर्त्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्॥")

ब्रह्मवादिनी, स्त्री, गायत्री। यथा,—

"आयाहि वरदे देवि! त्र्यक्षरे ब्रह्मवादिनि!॥"
इत्यादि गायत्र्या आवाहनम्॥

ब्रह्मविद्या, स्त्री, (ब्रह्मणो ब्रह्मविषयिणी या विद्या।) ब्रह्मज्ञानम्। यथा,—

"न्यायागतधनः शान्तो ब्रह्मविद्यापरायणः।
स्वधर्म्मपालको नित्यं सोऽमृतत्वाय कल्पते॥"
इति कौर्म्मे ३ अध्यायः॥

(दुर्गा। यथा, महाभारते। ६। २२। २७।

"त्वं ब्रह्मविद्या विद्यानां महानिद्रा च देहिनाम्।
स्कन्दमातर्भगवति! दुर्गे कान्तारवासिनि!॥")

ब्रह्मविन्दुः, पुं, (ब्रह्मणो विन्दुः।) वेदपाठे मुखनिर्गतविन्दुः। इति भरतः॥

ब्रह्मवृक्षः, पुं, (तदाख्यया प्रसिद्धो वृक्षः। यद्वा, ब्रह्मणे वेदकर्म्मार्थं यो वृक्षः।) पलाशवृक्षः। इति हलायुधः॥ उडुम्बरः। इति रत्नमाला॥

ब्रह्मवृत्तिः, स्त्री, (ब्रह्मणो ब्राह्मणस्य वृत्तिर्जीवनोपायः।) ब्राह्मणस्य जीवनोपायः। यथा,—

"स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेत्तु यः।
षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः॥"
इति श्रीभागवतम्॥

ब्रह्मवेदः, पुं, (ब्रह्मणो वेदः ज्ञानम्।) ब्रह्मज्ञानम्। यथा,—

"प्राणायामः परं ब्रह्म परमात्मा चतुर्मुखः।
प्राणायामैः परं विष्णोर्ब्रह्मवेदस्वरूपकम्॥"
इति गीतासारः॥

ब्रह्मवेदिः, स्त्री, (ब्रह्मणो वेदिरिव।) देशविशेषः। यथा,—

"ब्रह्मवेदिः कुरुक्षेत्रं पञ्चरामह्रदान्तरम्॥"
इति हेमचन्द्रः। ४। १६॥

ब्रह्मवैवर्त्तं, क्ली, (विवृतिरेव वैवर्त्तम्। स्वार्थे अण्। ब्रह्मणो वैवर्त्तं विशेषेण विवृतिर्यत्र।) यथा च ब्रह्मवैवर्त्ते ब्रह्मखण्डे। १। ५८।

"विवृतं ब्रह्म कार्त्स्न्येन कृष्णेन यत्र शौनक!।
ब्रह्मवैवर्त्तकं तेन प्रवदन्ति पुराविदः॥")
अष्टादशमहापुराणान्तर्गतदशमपुराणम्। यथा,

"अष्टादशसहस्रञ्च ब्रह्मवैवर्त्तमीरितम्।
सर्व्वेषाञ्च पुराणानां सारमेव विदुर्बुधाः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १३२ अः॥

ब्रह्मशल्यः, पुं, (ब्रह्मेव सूक्ष्मं शल्यमग्रभागो यस्य। अतिसूक्ष्माग्रत्वात्तथात्वम्।) सोमवल्कः। इति रत्नमाला॥ बावला इति भाषा॥

ब्रह्मशासनं, क्ली, (ब्रह्मणः शासनं निर्णयो उपदेशो वा यस्मिन्।) ब्रह्मविचारस्थानम्। तत्पर्य्यायः। धर्म्मकीलकः २। इति शब्दरत्नावली॥ ब्रह्मणआज्ञा॥ नवद्वीपस्य पूर्व्वदक्षिणकोणे गङ्गापारे ग्रामविशेषे, पुं॥ (ब्रह्मणो विधातुः शासनम्। वेदः॥ प्रतिपादितमेतत् बृहन्नारदीये ४ पादे १०९ अध्याये॥)

ब्रह्मसंहिता, स्त्री, (ब्रह्मणः संहिता।) भगवत्सिद्धान्तसंग्रहग्रन्थविशेषः। यथा,—

"अध्यायशतसम्पन्ना भगवद्ब्रह्मसंहिता।
सर्व्वोपनिषदां सारैः सञ्चिता ब्रह्मणोदिता॥"
इति ब्रह्मसंहितायां भगवत्सिद्धान्तसंग्रहे मूलसूत्राख्यपञ्चमाध्यायस्य जीवगोस्वामिकृतटीका॥

ब्रह्मसम्भवः, पुं, द्वितीयनामकजिनविशेषः। इति हेमचन्द्रः॥

ब्रह्मसर्पः, पुं, (ब्रह्म इव महान् सर्पः।) सर्पविशेषः। तत्पर्य्यायः। हलाहलः २ अम्बजाला ३। इति त्रिकाण्डशेषः॥

ब्रह्मसायुज्यं, क्ली, (युनक्तीति युजः। "इगुपधेति।" ३।१।१३५। कः। ततः "तेन सहेति।" २।२।२८। इति बहुव्रीहिः। "वोपसर्ज्जनस्य।" ६।३।८२। इति सहस्य सः। ततः सयुजस्य भावः सायुज्यं। यद्वा, योजयतीति युक् सम्पदादित्वात् क्विप्। ततो बहुव्रीहिस्ततः सयुजो भावः। ततः ब्रह्मणः सायुज्यं योजकत्वम्।) ब्रह्मणो भावः। तत्पर्य्यायः। ब्रह्मभूयम् २ ब्रह्मत्वम् ३। इत्यमरः। २।७।५२॥ ब्रह्मसायूज्यम् ४। इति शब्दरत्नावली॥ (मुग्धबोधमतेऽस्य व्युत्पत्तिर्यथा।) ब्रह्मणो भवनं तादूप्यं ब्रह्मभूयं भूहनः क्यविति क्यप्। त्वतौ भावे इति त्वे ब्रह्मत्वं। योजनं युक् तत्सहितः सयुक् तद्भावः सायुज्यं ततो ब्रह्मणा विग्रहः। इति भरतः॥

ब्रह्मसावर्णिः, पुं, (ब्रह्मपुत्रो सावर्णिः।) दशम मनुः। अस्मिन् मन्वन्तरे विष्वक्सेनोऽवतारः। शम्भुरिन्द्रः। सुरसेनविरुद्धाद्याः देवाः। हविष्मदाद्याः सप्तर्षयः। भूरिसेनाद्या मनुपुत्रा भविष्यन्ति। इति श्रीभागवतम्।८।१३।२१-२२॥ अन्यच्च।

"मन्वन्तरे तु दशमे ब्रह्मपुत्रस्य धीमतः।
सुरसेना विरुद्धाश्च द्विप्रकारास्तथा सुराः॥
शतसंख्या हि ते देवा भविष्यास्तत्र वै सुराः।
तत्पुत्राणां शतं भावि तद्देवानां तदा शतम्॥
शान्तिरिन्द्रस्तदा भावी सर्व्वैरिन्द्रगुणैर्युतः।
सप्तर्षींस्तु निबोध त्वं ये भविष्यन्ति वै तदा॥
आपो मूर्त्तिर्हविष्मांश्च सुकृती सत्य एव च।
नाभागोऽप्रतिमश्चैव वाशिष्ठश्चैव सप्तमः॥
सुक्षेत्रश्चोत्तमौजाश्च भूरिसेनः सुवीर्य्यवान्।
शतानीकोऽथ वृषभो अनमित्रो जयद्रथः॥
भूरिद्युम्नः सुवर्च्चाश्च तस्यैते तनया मनोः।"
इति ब्रह्मसावर्णिकम्।
इति मार्कण्डेयपुराणे॥ ९४। ११-१६॥